CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥सजयतिरघुवंशतिलकःकौशल्याहृदयनंदनो रामःदश[illegible]वदन
निधनकारीदासरथिपुंडरीकाक्षः १ कूजंतंरामरामेतिमधुरंमधुराक्षरं आरुह्यकविताश
खांवंदेवाल्मीककोकिलं २ वाल्मीकेर्मुनिसिंहस्यकवितावनचारिणः श्रृण्वन्रामकथा
नादंकोनयातिपरांगतिं ३ यःपिबन्सततंरामचरितामृतसागरं अतृप्तस्तंमुनिंवंदेप्राचेत
समकल्मषं ४ गोष्पदीकृतवारीशंमशकीकृतराक्षस रामयनमहामालारत्नंवंदेनिलात्म
जम् ५ यत्रयत्रराघुनाथकीर्तनंतत्रतत्रकृतमस्तकांजलिं वाष्पवारिपरिपुर्णलोचनंमारु
तिंनमतराक्षसांतकं ६ जितंभगवतातेनहरिणालोकधारिणा अजेनविश्वरूपेननिर्गु
णेनगुणात्मना ७ श्री तपःस्वाध्यायनिरतंतपस्वीवाग्विदांवरं नारदंपरिपप्रछवाल्मीकि ८
र्मुनिपुंगवं १ कोन्वस्मिन्सांप्रतंलोकेगुणवान्कश्चवीर्य्यवान् धर्मज्ञश्चकृतज्ञश्चसत्यवा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

धश्चप्रजानांचहितेरतः यशस्वीज्ञानसंपन्नः शुचिर्वश्यःसमाधिमान् १२ प्रजापतिःसमःश्री
मान्धातारिपुनिषूदनः रक्षिताजीवलोकस्यधर्मस्यपरिरक्षिता १३ रक्षितास्वस्यधर्मस्य
स्वजनस्यचरक्षिता वेदवेदागतत्वज्ञोधनुर्वेदेचनिष्ठितः १४ सर्वशास्त्रार्थतत्वज्ञःस्मृति
मान्प्रतिभानवान् सर्वलोकप्रियःसाधुरदीनात्माविचक्षणः १५ सर्वदाभिगतःसद्भिः
समुद्रइवसिंधुभिः आर्द्रःसर्वसमश्चैवसदैवप्रियदर्शनः १६ सचसर्वगुणोपेतःकौश
ल्यानंदवर्द्धनः समुद्रइवगांभिर्यधैर्येणहिमवानिव १७ विष्णुनासदृशोवीर्येसोमवत्प्रि
यदर्शनः कालाग्निसदृशःक्रोधेक्षमयापृथिवीसमः १८ धनदेनसमस्त्यागेसत्येधर्मइ
वापरः तमेवगुणसंपन्नरामंसत्यपराक्रमं १९ ज्येष्ठंश्रेष्ठगुणैर्युक्तंप्रियंदशरथःसुतं
प्रकृतिनांहितैर्युक्तंप्रकृतीप्रियकाम्यया २० योवराज्येनसंयोक्तुमैच्छत्प्रीत्यामहीपतिः न

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कोदृष्वन्तः २ चारित्रेणचकोयुक्तःसर्वभूतेषुकोहितः विद्वान्कःकःसमर्थश्चकश्चैकःप्रियदर्शनः ३
आत्मवान्कोजितःक्रोधोद्युतिमान्कोऽनसूयकः कस्यबिभ्यतिदेवाश्चजातरोषस्यसंयुगे ४
एतदिच्छाम्यहंश्रोतुंपरंकौतूहलंहिमे महर्षेत्वंसमर्थोसिज्ञातुमेवंविधंनरं ५ श्रुत्वाचैतन्त्रि
लोकज्ञोवाल्मीकेर्नारदोवचः श्रुयतामितिचामंत्र्यप्रहृष्टोवाक्यमब्रवित् ६ बहवोदुर्लभा
श्चैवयेत्वयाकीर्तितागुणाः मुनेवक्ष्याम्यहंबुधातैर्युक्तःश्रुयतांनरः ७ इक्ष्वाकुवंशप्रभ
वोरामोनामजनैश्रुतः नियतात्मामहावीर्योद्युतिमान्धृतिमान्वशी ८ बुद्धिमान्नीतिमा
न्वाग्मीश्रीमान्शत्रुनिवर्हणः विपुलांसोमहाबाहुःकंबुग्रीवोमहाहनु ९ महोरस्कोमहेष्वासो
गुप्तजत्रुरिंदमः अजानबाहुःसुशिराःसुललाटःसुविक्रमः १० समःसमविभक्तांगः
स्निग्धवर्णःप्रतापवान् पीनवक्षाविशालाक्षोलक्ष्मीवान्शुभलक्षणः ११ धर्मज्ञःसत्यसं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मावसथंहृत्वारममाणावनेत्रय ३१ देवगंधर्वसंकाशास्तत्रतेनबसन्मुखं चित्रकुटंगतेरा
मेपुत्रशोकातुरस्तदा ३२ राजादशरथःस्वर्गजगामविलपन्सुतं मृतेनुतस्मिन्भरतोबशि
ष्टप्रमुखैर्द्विजैः ३३ नियोज्यमानोराज्यायनैच्छद्राज्यंमहाबलः सजगामवनंवीरराम
पादप्रसादकः ३४ गत्वातुसमहात्मानंरामसत्यपराक्रमं अभ्याचष्टानंरामआर्यभावपुर
स्कृतः ३५ त्वमेवराजाधर्मज्ञइतिरामंबचोब्रवित् रामोपिपरमोदारःसुमुखःसुमहायशा ३६
नचैच्छत्पितुरादेशाद्राज्यंरामोमहाबलः पादुकेचास्यराज्यायन्यासंदत्वापुनःपुनः ३७ निवर्त
यामासततोभरतंभरताग्रजः सकाममनवाप्यैवरामपादावुपस्पृशन् ३८ नंदिग्रामेकरो
द्राज्यंरामागमनकांक्षया गतेतुभरतेश्रीमन्सत्यसंधोजितेंद्रियः ३९ रामस्तुपुनरालक्ष्य
नागरस्यजनस्यच तत्रागमनमेकाग्रोदंडकान्प्रविवेसह ४० प्रविश्यतुमहारण्येरामो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्याभिषेकेसंभारान्दृष्ट्वाभार्याथकैकयी २१ पुर्वदत्तवरादेवीवरमेनमयाचत विवासनंचरा
मस्यभरथस्याभिषेचनं २२ ससत्यवचनाद्राजाधर्मपाशेनसंयतः विवासयामाससुतंरामं
दशरथःप्रियं २३ सजगामबनंवीरःप्रतिज्ञामनुपालयन् पितुर्वचननिर्देशात्कैकेय्या
प्रियकारणात् २४ तंव्रजंतंप्रियोभ्रातालक्ष्मणोनुजगामह स्नेहाद्विनयसंपन्नःसुमित्रा
नंदवर्धनः २५ रामस्यदयिताभार्यानित्यंप्राणसमाहिता जनकस्यकुलेजातादेवमायेवनि
र्मिता २६ सर्वलक्षणसंपन्नानारीणांसुतमाबधु सीताप्यनुगतारामंशशिनंरोहिणीय
था २७ पौरैरनुगतोदूरंपित्रारथेनच श्रृंगीबेरपुरेसूतंगंगाकुलेव्यसर्जयत् २८
गुहमासाद्यधर्मात्मानिषादाधिपतिंप्रियं २९ गुहेनसहितोरामोलक्ष्मणेनचसीतया ते
वनेनबनंगत्वानदीस्तीर्त्वाबहुस्का ३० चित्रकूटमनुप्राप्यभारद्वाजस्यशासनात् रम्य

भ्रातरंदयि
तोभ्रातसो
भ्रात्रमनुदर्श
यन्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वार्यमाणःसुबहुशोमारीचेनसरावणः ५० नविरोधोबलवताक्षमोरावणतेनते अनादृ
त्यतुतद्वाक्यंरावणःकालचोदितः ५१ जगामसहमारीचस्तस्याश्रमपदंतदा तेनमाया
विनादुरमयवासन्नपात्मजौ ५२ जहारभार्यारामस्यगृध्रंहत्वाजटायुषं गृध्रंचनिह
तंदृष्ट्वाहृतांश्रुत्वाचमैथिलीं ५३ राघवःशोकसंतप्तोविललापाकुलेंद्रियः ततस्तेनैव
शोकेनगृध्रंदग्ध्वाजटायुषं ५४ मार्गमाणोवनेसीतांराक्षसंसंदर्शह कबंधंनामरूपेणवि
कृतंघोरदर्शनं ५५ तंनिहत्यमहाबाहुर्दाहस्वर्गतश्चसः सचास्यकथयामासश्रवणींधर्मचा
रिणीं ५६ शबरींधर्मनिपुणामभिगच्छेतिराघव सोभ्यगच्छन्महातेजाःशबरींशत्रुसूदनः ५७
शबर्यापूजितःसम्यग्रामोदशरथात्मजः पंपातीरेहनुमतासंगतोवानरेणह ५८ हनुमद्वच
नाच्चैवसुग्रीवेणसमागतः सुग्रीवायचतत्सर्वंशंसद्रामोमहाबलः ५९ आदितश्चयथाबत्तं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राजीवलोचनः विराधंराक्षसंहत्वाशरभंगंदर्शसः ४१ सुतीक्ष्णंचाप्यगस्त्यंचअगस्त्यभ्रा
तरंतथा अगस्त्यबचनाच्चैवजग्राहैश्वराशनं ४२ खड्गंचपरमप्रीतस्तूणीचाक्षयसायको
वसतस्तस्यरामस्यबनेबनचरैसह ४३ ऋषयोभ्याएमन्सर्ववधायासुररक्षसां स
तेषांप्रतिशुश्रावराक्षसानांतथावने ४४ प्रतिज्ञातश्चरामेणवधःसंयतिरक्षसां ऋषी
णामग्निकल्पानांदंडकारण्यवासिनां ४५ तेनतत्रैववसताजनस्थाननिवासिनी
बिरूपिताशुर्पणखाराक्षसीकामरूपिणी ४६ ततःशुर्पणखावाक्यादुद्युक्तान्सर्वराक्ष
सान् खरंत्रिशिरसंचैवदुषणंचैवराक्षसं ४७ निजघानरणेरामस्तेषांचैवपदानुगान्
वनेतस्मिन्निवसतांजनस्याननिवासिनां ४८ रक्षसांनिहतान्यासान्सहस्राणिचतुर्द
श ततोऽतिबधंश्रुत्वारावणःक्रोधमुर्छितः ४९ सहायंवरयामासमारीचंनामराक्षसं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

समागतः निजघानचतत्रैनंशरेणैकेनराघवः ६८ ततःसुग्रीवबचनाद्धत्वावालिनमा
हवे सुग्रीवमेवतद्राज्येराघवःप्रत्यपादयत् ७० सचसर्वान्समानयवानरान्वानरर्षभः दि
शःप्रस्थापयामासदिदृक्षुर्जनकात्मजा ७१ ततोगृध्रस्यवचनात्संपातेर्हनुमान्बली
शतयोजनविस्तीर्णंपुप्लुवेलवणार्णवम् ७२ ततलंकांसमासद्यपुरींरावणपालितां द
र्शसीतांध्यायंतीमशोकवनिकांगतां ७३ निवेदयित्वाभिज्ञानंप्रवृत्तिंचनिवेद्यच स
माश्वस्यचवैदेहींमर्दयामासतोरणं ७४ पंचसेनाग्रगान्हत्वासप्तमंत्रिसुतानपि॥
शूरमक्षंचनिष्पेष्यग्रहणंसमुपागमत् ७५ अस्त्रेणोन्मुक्तमात्मानंज्ञात्वापैतामहाद्वरा
त् मर्षयन्राक्षसान्वीरोमंत्रिणस्तान्यदृच्छया ७६ ततोदग्ध्वापुरीलंकामृतेसीताचमै
थिलीं रामायप्रियमाख्यातुंपुनरायान्महाकपिः ७७ साभिगम्यमहात्मानंकृत्वारामं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सीतायाश्चविशेषतः सुग्रीवश्चपिनन्सर्वंश्रुत्वारामस्यवानरः ६० चकारसख्यंरामेणप्रीत
श्चैवाग्निसाक्षिकं ततोवानरराजेनवैरानुकथनंप्रति ६१ रामायावेदितंसर्वंप्रणयादुः
खितेनच प्रतिज्ञातंचरामेणतदावालिवधंप्रति ६२ वालिनश्चबलंतत्रकथयामास
वानरः सुग्रीवःशंकितश्चास्मिन्नित्यंवीर्येणराघवे ६३ राघवःप्रत्ययार्थंतुदुंदुभेकायमुत्त
मं दर्शयामाससुग्रीवोमहापर्वतसन्निभं ६४ उत्स्थित्वामहाबाहुःप्रेक्ष्यचास्थिमहा
बलः पादाङ्गुष्ठेनचिक्षेपसपुर्णंदशयोजनं ६५ विभेदचपुनःशालान्सप्तैकेनमहेषु
णा गिरीन्रसातलंचैवजनयन्प्रत्ययंतदा ६६ ततःप्रीतमनास्तेनविश्वस्तःसमहाक
पिः किष्किंधांरामसहितोजगामवगुहातदा ६७ ततोऽगर्जद्धरिवरःसुग्रीवोहेमपिं
गलः तेननादेनमहता निर्जगामहरीश्वरः ६८ अनुमान्यतदातारंसुग्रीवेण

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हनुः ८६ भरद्वाजाश्रमंगत्वाराम:सत्यपराक्रम: भरतस्यांतिकंरामोहनुमंतंव्यसर्जयत् ८७
पुष्पकंतत्समारुह्यनंदिग्रामंययौतदा ८८ नंदि
ग्रामेजटांहित्वाभ्रातृभि:सहितोनघ राम:सीतामनुप्राप्यराज्यंपुनरवाप्तवान् ८९
प्रहृष्टमुदितालोकस्तुष्ट:पुष्ट:सुधार्मिक: निरामयोह्यरोगश्चदुर्भिक्षभयवर्जित: ९० नपु
त्रमरणंकिंचिदरक्ष्यंतिपुरुषा:क्वचित् नार्यश्चविधवानित्यंभविष्यंतिपतिव्रता ९१ नचा
ग्निजंभयंकिंचिन्नासुमज्जंतिजंतव: नवातजंभयंकिंचिन्नापिज्वरभयंतथा ९२ नचापिक्षु
ज्जयंतत्रनतस्करभयंतथा नगराणिचराष्ट्रानिधनधान्ययुतानिच ९३ नित्यंप्रमुदितासर्वे
यथाकृतयुगेतथा अश्वमेधशतैरिष्ट्वातथावहुसुवर्णकै: ९४ गवांकोट्ययुतंदत्वाब्रह्मलोकं
प्रयास्यति असंख्येयंधनंदत्वाब्राह्मणेभ्योमहायशा: ९५ राजवंश्यान्शतगुणान्स्थापयिष्य

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रदक्षिणं न्यवेदयदमेयात्मादृष्टासीतेतितत्वतः ७८ ततःसुग्रीवसहितोगत्वातीरं
होदधेः समुद्रक्षोभयामासशरैरादित्यसंनिभैः ७९ दर्शयामास चात्मानंसमुद्रःसरि
तांपतिः समुद्रवचनाच्चैवनलंसेतुमकारयत् ८० तेनगत्वापुरीलंकांहत्वारावणमा
हवे रामःसीतामनुप्राप्यपरांव्रीडामुपागमत् ८१ तामुवाचततोरामःपरुषंजनसं
सदि अमृष्यमाणासासीताविवेशज्वलनंसती ८२ ततोग्निवचनात्सीतांज्ञात्वा
विगतकल्मषां (अगृहीरमलांरामोवचनाच्चशुभेस्तदा) कर्मणातेनमहातत्रैलोक्यंसचरा
चरं ८३ सदेवर्षिगणंतुष्टंराघवस्यमहात्मनः बभौरामःसंप्रहृष्टःपुजितःसर्वदेवतैः
८४ अभिषिच्यचलंकायांराक्षसेंद्रंविभीषणं कृतकृत्यस्तदारामोविज्वरःप्रमुमोदह
८५ देवताभ्योवरंप्राप्यसमुत्थाप्यचवानरान् अयोध्यांप्रस्थितोरामःपुष्पकेनसुहृ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तिरघवः चानुर्वेएपचलोकेस्मिन्स्वेस्वेधर्मेनियोक्ष्यति ९६ दशवर्षसहस्राणिदशवर्षशता
निच रामोराज्यमुपासित्वाब्रह्मलोकंगमिष्यति ९७ इदंपवित्रंपापघ्नंपुण्यंवेदैश्चसंमितं
यःपठेद्रामचरितंसर्वपापैःप्रमुच्यते ९८ एतदाख्यानमायुष्यंपठन्रामायणंनरः सपुत्रपौ
त्रःसगणःप्रेत्यस्वर्गेमहियते ९९ पठन्द्विजोवाग्वृषभत्वमीयात्स्यात्क्षत्रियोभुमिपतित्व
मीयात् वणिग्जनःपण्यफलत्वमीयात् जनश्चशूद्रोपिमहत्वमीयात् १०० इत्यार्षेश्रीम
द्रामायणेआदिकाव्येवाल्मीकीयेबालकांडेसंक्षेपोनामप्रथमःसर्गः छुभमस्तुशुभंभवंतुश्री

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(वाल्मीकी बाल काण्ड)

Kashi Maharani Collection, Ramnagar Fort, Varanasi